प्रकाशकमन्त्रभेदात् अत्र बोधनमन्त्रावुक्तावेव आमन्त्रणमन्त्रौ तु "मेरुमन्दरकैलासहिमवच्छिखरे गिरौ"। इत्यादौ प्रागुक्तदेवीपुराणे नवमीषष्ठ्योर्बोधनामन्त्रणयोः पृथक्त्वाभिधानाच्च। ततश्च षष्ठ्यामुभयकरणेऽपि पत्नीप्रवेशपूर्वदिने सायंषष्ठीलाभे एकदैवोभयकरणम्। यदा तु पूर्वदिने सायंषष्ठीलाभः न परदिने सायंषष्ठीलाभः तदा पूर्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायंषष्ठ्यलाभस्तदा परदिने पूर्वाह्णे षष्ठ्यां बोधनं "बोधयेद् बिल्वशाखायां षष्ठ्यां देवीं फलेषु च॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्"।

**बोधनी** स्त्री बोध्यतेऽनया अत्र वा बुध–णिच्–करणे आधारे वा ल्युट्। १पिप्पल्यां तया हि मूर्च्छितो बोध्यते। २कार्त्तिकशुक्लैकादश्यां तत्र हि हरेर्बोधनम्। "शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन" इति तिथ्यादित०। "तावद्गर्जन्ति तीर्थानि वाजिमेधादयो मखाः। मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी" हरिभक्तिविलासे पद्मपु०वचनम्।

**बोधवासर** पु० ६त०। १हरिबोधनदिने कार्त्तिकशुक्लैकादश्याम् २तत्कर्त्तव्ये व्रते च। "जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि। वृथा भवति तत् सर्वं न कृत्वा बोधवासरम्" हरिभक्तिविरसधृतस्कान्दपु०।

**बोधान** त्रि० बुध–आनच्। १विज्ञे २गीष्पतौ शब्दर०।

**बोधि** पु० बुध–इन्। १समाधिभेदे २पिप्पलवृक्षे ३बुद्धभेदे मेदि० ४बोधे त्रिका०। ५ज्ञातरि त्रि०। [ऽश्वत्थ पु०

**बोधितरु** पु० कर्म०। अश्वत्थवृक्षे हेमच०। बोधिद्रुमादयो-

**बोधिसत्त्व** न० बोधि बोधयुतं सत्त्वम्। बुद्धभेदे हेमच०।

**बौद्ध** न० बुद्धेन प्रोक्तमण्। १बुद्धशास्त्रभेदे तच्च शास्त्रं प्रथमं बृहस्पतिना प्रयुक्तं तच्च बुद्धावतारे प्रपञ्चितम्। यथोक्तं मत्स्यपु० २४ अ०।

"आयुषो नहुषः पुत्रो वृद्धशर्मा तथैव च। रजिर्दम्भो विपाप्मा च वीराः पञ्च महारथाः। रजेः पुत्रशतं जज्ञे राजेयमिति विश्रुतम्" इत्युपक्रमे "रजिपुत्रैस्तदाक्षिप्तं बलादिन्द्रस्य वैभवम्। यज्ञभागश्च राज्यञ्च तपोबलगुणान्वितैः। राज्याद् भ्रष्टस्तदा शक्रो रजिपुत्रैर्निपीडितः। प्राह वाचस्पतिं दीनः पीड़ितोऽस्मि रजेः सुतैः। न यज्ञभागो राज्यं मे निर्जितस्य बृहस्पते!। राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप!। ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम्। ग्रहशान्तिविधानेन पौष्टिकेन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्। जघान शक्रो वज्रेण सर्वान् धर्मबहिष्कृतान्"। तदधीते वेत्ति वा पुनः अण्। २तच्छास्त्राध्यायिनि ३तद्वेत्तरि च त्रि०। बुद्धशब्दे तन्मतं दर्शितम्।

**बौध** पु० बुधस्यायम् शैषिकोऽण्। बुधात्मजे पुरूरवसि हेम०।

**बौधायन** पु० बोधस्य गोत्रापत्यम् आङ्गिरसभिन्नम् इञ्। ततो यूनि इञन्तत्वात् फक्। यूनि बोधगोत्रापत्ये ऋषिभेदे तेन च कल्पसूत्रसुपस्कृतिश्च कृता।

**बौधि** पु० बोधस्य गोत्रापत्यमाङ्गिरसभिन्नम् इञ्। बोधस्य गोत्रापत्ये आङ्गिरसभिन्ने आङ्गिरसे तु यञ्। बौध्य इत्येव

**बौध्य** पु० बोधस्य गोत्रापत्यमाङ्गिरसः यञ्। आङ्गिरसे बोधगोत्रापत्ये तद्गीता च भा० शा० १७८अ० दर्शिता यथा "बौध्य उवाच। "उपदेशेन वर्त्तामि नानुशास्मीह कञ्चन। लक्षणं तस्य वक्ष्येऽहं तत्स्वयं परिमृश्यताम्। पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने। इषुकारः कुमारी च षड़ेते गुरवो मम"। भीष्म उवाच "आशा बलवती राजन्नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला१। सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः२ सुखमेधते। गृहारम्भो हि दुःखाय न सुखाय कदाचन। सर्पः३ परकृतं वेश्म प्रविश्य सुखमेधते। सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिं समाश्रिताः। अद्रोहेणैव भूतानां सारङ्गा४ इव पक्षिणः। इषुकारो५ नरः कश्चिदिषावासक्तमानसः। समीपेनापि गच्छन्तं राजानं नावबुद्धवान्। बहूनां कलहो नित्यं द्वयोः सङ्कथनं ध्रुवम्। एकाकी विचरिष्यामि कुमारीशङ्खको६ यथा"। बोधो देशभेदोऽभिजनोऽस्य शण्डिकाः ञ्य। पित्रादिक्रमेण २तद्देशवासिनि त्रि०।

**ब्य(व्य)ध** ताड़ने दिवा० पर० सक० अनिट्। वि(वि)ध्यति अव्या(व्या)त्सीत् वि(वि)व्या(व्या)ध वध्यादित्वे सनि विव्यत्सति। [अवव्युषत् त।

**ब्युष** उत्सर्गे विभागे च चु०उभ०सक० सेट्। व्युषयति–ते

**ब्र(व्र)ण** शब्दे भ्वा०पर०अक०सेट्। (व्र)ब्रणति। अब्र(व्र)णीत्-अ(ब्र)व्राणीत्। कविकल्पद्रुमेऽयमन्त्यस्थादिः।

**ब्रध्न** पु० बन्ध–नक् ब्रधादेशः। १सूर्य्ये २अर्कवृक्षे अमरः। ३शिवे हेमच०। ४दिने ५अश्वे निघण्टुः ६मूलभेदे